# Jaigishavyakritam Shivabhaktimahimavarnanam

# जैगीषव्यकृतं शिवभक्तिमहिमावर्णनम्

## Document Information

Text title : Jaigishavyakritam Shivabhaktimahimavarnanam

File name : shivabhaktimahimAvarNanamjaigIShavyakRRitaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 6 - jaigIShavyAgamanam | 1-26(1) ||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# जैगीषव्यकृतं शिवभक्तिमहिमावर्णनम्

त्वमेव देवदेवेश पिता माता सखा प्रभुः ।
त्वमेव सर्वं देवेश विश्वेश्वर महेश्वर ॥ ६.१॥

नजाने गिरिजाजाने त्वत्तोह्यन्यं सुरेश्वर ।
तस्मात्प्रसीद भगवन् करुणासागराधुना ॥ ६.२॥

प्रपन्नोऽस्मि पदद्वन्द्वं निर्द्वन्द्वं ते महेश्वर ।
भ्रातरौ स्कन्दहेरम्बौ सखायो गणपा मम ॥ ६.३॥

जगतां जननी गौरी जनित्री मम शङ्करी ।
जगत्पिता त्वमेवेश पिता मम महेश्वर ॥ ६.४॥

नान्यं वरं वृणे देव त्वत्पादाम्बुजभक्तितः ।
सैव धर्मार्थकामादिमोक्षहेतुर्ममाधुना ॥ ६.५॥

यया भक्त्या महादेव मुक्तास्सर्वेसुरासुराः ।
त्वद्भक्त एव जगतिमुक्तोऽन्यान्मोचयत्यपि ॥ ६.६॥

त्वद्भक्त्यैव विधिर्विश्वं सृजत्येव महेश्वर ।
त्वत्तो वेदानधिगतस्सत्यलोकाधिपोऽभवत् ॥ ६.७॥

विष्णुस्तव पदद्वन्द्वं नेत्राब्जेन समर्चयन् ।
दैत्यवृन्दैकसंहत्यै चक्रं प्राप सुदर्शनम् ॥ ६.८॥

त्वद्भक्त्यैव विरूपाक्ष वैकुण्ठस्याधिपोऽभवत् ।
पद्मसद्मापतिश्चापि जातो रुद्रस्त्वदाश्रयात् ॥ ६.९॥

दत्वा शूलवरं तस्मै रुद्रायामिततेजसे ।
रुद्राणामाधिपत्ये च त्वया सोऽप्यभिषेचितः ॥ ६.१०॥

यस्यशूलानलज्वालादग्धमन्ते चराचरम् ।
शक्रोऽमरेन्द्रतां प्राप्तस्त्वद्भक्त्ययैव हराधुना ॥ ६.११॥

शचीपतित्वं सम्प्राप नानास्वर्गैकभोगभाक् ।
धनाधिपत्वनधनदस्त्वद्भक्त्ययैव महेश्वर ॥ ६.१२॥

यमोऽपित्वत्पदार्चातो लोकपालोऽभवच्छिव ।
वरुणोयादसान्नाथस्सूर्यचन्द्रानिलानलाः ॥ ६.१३॥

त्वद्भक्त्यैव विरूपाक्ष लेमिरे दिक्पतित्वताम् ।
समर्चयन्ति त्वल्लिङ्गंभक्त्या सर्वेसुरासुराः ॥ ६.१४॥

सहस्रभुजतां प्राप्तो बाणो भक्त्या तवेश्वर ।
पौलस्त्यतनयश्शम्भो रावणो लोकरावणः ॥ ६.१५॥

जिग्ये सुरान्नृपवरांस्त्वद्भक्त्यैव महेश्वर ।
घटोद्भवेन त्वद्भक्त्या समुद्राश्चुलुकीकृताः ॥ ६.१६॥

दधीचिनापित्वद्भक्त्याविष्णवे रूपमद्भुतम् ।
दर्शितम्मायिने शम्भोभृगुणाशापितोहरिः ॥ ६.१७॥

उपमन्युनाचबालेनलब्धःक्षीरैकवारिधिः ।
त्वद्भक्त्याकालपाशैश्चपाशितोऽपिमृकण्डुजः ॥ ६.१८॥

जिगाय मृत्युं तरसा श्वेतोऽपि नृपनन्दनः ।
शिलाशनेन त्वद्भक्त्यापुत्रःप्राप्तोह्ययोनिजः ॥ ६.१९॥

त्वद्भक्त्यानन्दिकेशोऽपिगाणापत्यमवाप्तवान् ।
चण्डीश्वरोऽपिपितरंहतवांस्तवभक्तितः ॥ ६.२०॥

मङ्कणोऽपिपुरासिद्धस्सिद्धिम्प्रापत्वदर्चनात् ।
सोमोऽपिमुक्तवात्राजयक्ष्मतस्त्वत्प्रसादतः ॥ ६.२१॥

दक्षोऽपि दीक्षितो यज्ञे शिक्षितोऽनुग्रहीकृतः ।
शतर्चनादयोऽपीशव्याघ्रपादादयस्तथा ॥ ६.२२॥

दुर्वासाद्या महाभागा दत्तात्रेयादयस्तथा ।
रामोऽपि भार्गवश्शम्भो नृपाणांकुलघातकः ॥ ६.२३॥

तथैवान्ये नृपतयस्सोमसूर्यान्वयोद्भवः ।
आदितेयाश्च दितिजा गणा रुद्रा मुनीश्वराः ॥ ६.२४॥

भूता भव्या वर्षमाना भक्तास्त्वद्भक्तिभाविताः ।
तव भक्त्यैव सर्वेषां स्वर्गमोक्षौ हि शङ्कर ॥ ६.२५॥

त्वद्भक्तिमेव याचेऽहं त्वनन्यगसिरीश्वर ।

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये जैगीषव्यकृता शिवभक्तिमहिमावर्णनम् ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ६ - जैगीषव्यागमनम् । १-२६(१) ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 6 - jaigIShavyAgamanam . 1-26(1) ..

Notes:

Jaigīṣavya जैगीषव्य worships Śiva शिव as his parent, friend and all-in-all; and, iterates that Śiva शिव - the Father of the Universe - is his father and Gaurī गौरी - the Mother of The Universe - is his Mother. Jaigīṣavya जैगीषव्य further eulogizes Śiva शिव by highlighting the merits and fruits of ŚivaBhakti शिवभक्ति as experienced by Viśṇu विष्णु, Indra इन्द्र, Dadhīci दधीचि, Virūpākṣa विरुपाक्ष et al.

Encoded and proofread by Ruma Dewan

---

*Jaigishavyakritam Shivabhaktimahimavarnanam*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*